12

0975CH12

# वर्णविचारः

इदानीं यावत् भवद्भिः संस्कृतभाषायाः वर्णानां ज्ञानं तु प्राप्तमेव। अतः सर्वप्रथमं वयमेतेषां संयोजनविच्छेदयोः अभ्यासं कुर्मः तद्यथा —

व् + अ + र् + ण् + अ + व् + इ + च् + आ + र् + अः – **वर्णविचारः**
क् + आ + र् + य् + अ + द् + अ + क् + ष् + अ + त् + आः – **कार्यदक्षताः**
प् + र् + इ + य् + अ + व् + आ + द् + इ + त् + आ – **प्रियवादिता**
ज् + ञ् + आ + न् + अ + प् + र् + आ + प् + त् + इः – **ज्ञानप्राप्तिः**

**1. एवमेव एतेषां पदानामपि संयोजनं कुरुत —**

i. स्+ऊ+क्+त्+इ+स्+औ+र्+अ+भ्+अ+म् – ...............................................
ii. प्+र्+अ+त्+य्+आ+ह्+आ+र्+अः – ...............................................
iii. अ+न्+उ+द्+आ+त्+त्+अः – ...............................................
iv. इ+क्+ष्+उ+द्+अ+ण्+ड्+अ+म् – ...............................................
v. म्+अ+ञ्+ज्+ऊ+ष्+आ – ...............................................
vi. ज्+ञ्+आ+न्+ए+च्+छ्+उः – ...............................................

**अधुना वर्णविच्छेदस्य अभ्यासं कुर्मः**

**धनञ्जयः** – **ध्+अ+न्+अ+ञ्+ज्+अ+य्+अः**
**प्रयच्छति** – **प्+र्+अ+य्+अ+च्+छ्+अ+त्+इ**
**स्वार्थान्धः** – **स्+व्+आ+र्+थ्+आ+न्+ध्+अः**
**चिरञ्जीवः** – **च्+इ+र्+अ+ञ्+ज्+ई+व्+अः**

**2. एवमेव एतेषां पदानामपि विच्छेदं कुरुत —**

i. विद्यालयः – ...............................................
ii. पुत्रप्रीत्या – ...............................................

iii. आज्ञापयति – ..........................................................

iv. प्रभृति – ..........................................................

v. प्रतीक्षा – ..........................................................

vi. अश्रद्धेयम् – ..........................................................

vii. सुरक्षितम् – ..........................................................

**अत्र वयं पश्याम: यत् स्वर-व्यञ्जनानां संयोजनेन शब्दनिर्माणं भवति। अत्र एतदपि ध्यातव्यं यत् —**

- 'स्वयं राजन्ते इति स्वरा:'
- अर्थात् स्वराणाम् उच्चारणाय अन्यवर्णस्य आवश्यकता न भवति परं व्यञ्जनानाम् उच्चारणाय स्वरा: सदैव अपेक्ष्यन्ते।
- स्वराणामपरं नाम अस्ति अच् इति।
- व्यञ्जनानां चापरं नाम अस्ति हल् इति।
- स्वरेण विरहितस्य व्यञ्जनवर्णस्य लेखनाय हलन्तचिह्नम् ( ् ) इति प्रयुज्यते। अत्र वर्णविन्यासं कर्तुं सदैव ध्यातव्यं यत् कोऽपि व्यञ्जनवर्ण: हलन्तचिह्नेन विना न लेखनीय:।

किं भवन्त: जानन्ति यत् सर्वेषाम् वर्णानाम् उच्चारणाय मुखे विशिष्टस्थानं वर्तते।

मयङ्क: – मोहन! इति उच्चारणक्रमे 'म' इति वर्णस्य उच्चारणे ओष्ठ: अपरम् ओष्ठं स्पृशति परं 'ह', 'न' इति पदयो: उच्चारणे ओष्ठ: न स्पृश्यते इति एतदनुभूयते।

अध्यापिका– आम्। यत: हकारस्य उच्चारणस्थानं कण्ठ: नकारस्य च दन्ता:।

तन्वी – आम्। मम नाम्नि अपि तकारस्य उच्चारणे जिह्वा दन्तान् स्पृशति।

शान्ति: – आम्। मम नाम्नि अपि शकारस्य उच्चारणं तालुना, परं नकारतकारयो: उच्चारणं मुखस्य सहायतया भवति (सर्वे छात्रा: शिक्षिकां प्रति)

महोदये! एतत् तु न कदापि विचारितम् यत् कथमस्माकं जिह्वा जानाति यत् कस्य वर्णस्य उच्चारणं मुखस्य केन भागेन कर्तव्यम्।

शिक्षक: (विहस्य) एतत् तु अतीव वैज्ञानिकं रहस्यम् यद् ज्ञात्वा वयं सकार-शकार-षकार इति वर्णानाम् उच्चारणे अवबोधने च त्रुटिकर्तॄन् बोधयितुं क्षमा: उच्चारणदोषं च मार्जयितुमपि समर्था:। अधुना उच्चारणस्थानानाम् अभ्यासं कुर्म:।

**1. एतेषां वर्णानाम् उच्चारणस्थानं लिखत–**

i. ट् ................ ओ ................ य् ................ ण् ................

ii. थ् ................ ज् ................ ग् ................ उ ................

iii. ए ................ न् ................ ऋ ................ व् ................

**2. एतेषु मूर्धन्यवर्णान् गोलाकार-युक्तान् कुरुत –**

च्, ल्, ए, म्, आ, ष्, य्, उ

**3. प्रदत्तानि उच्चारणस्थानानि अधिकृत्य द्वौ वर्णौ लिखत –**

i. ओष्ठ्य: – ................ दन्त्य: – ................

ii. तालव्य: – ................ कण्ठ्य: – ................

iii. कण्ठोष्ठ्य: – ................ नासिक्य:– ................

**4. प्रदत्तपदेभ्य: यथानिर्दिष्टम् उच्चारणस्थानानुरूपं वर्णान् चित्वा लिखत –**

i. जाड्यम् – (मूर्धन्यवर्ण:)

ii. वर्तते – (दन्तोष्ठ्यवर्ण:)

iii. स्वीकरोतु – (तालव्यवर्ण:)

iv. विहितम् – (कण्ठ्यवर्ण:)

v. प्रतिज्ञा – (ओष्ठ्यवर्ण:)

vi. उत्थाय – (दन्त्यवर्ण:)

vii. पाषाणतले – (ओष्ठ्यवर्ण:)

viii. प्राणिनाम् – (नासिक्यवर्ण:)

ix. आश्रमे – (कण्ठतालव्य:)

x. लतासु – (दन्त्यवर्ण:)

**5. वर्णानाम् उच्चारणस्थानानां सरलतया ज्ञानार्थम् एतानि सूत्राणि स्मरत –**

i. अकुहविसर्जनीयानां कण्ठ:। (अ, आ, कवर्ग, ह विसर्ग)

ii. इचुयशानां तालु:। (इ, ई, चवर्ग, य्, श्)

iii. ऋटुरषाणां मूर्धा। (ऋ, ॠ, टवर्ग, र्, ष्)

iv. लृतुलसानां दन्ता:। (लृ, तवर्ग, ल्, स्)

v. उपूपध्मानीयानामोष्ठौ। (उ, ऊ, पवर्ग, उपध्मानीय)
vi. ञमङणनानां नासिका। (ञ्, म्, ङ्, ण्, न्)
vii. एदैतो: कण्ठतालु। (ए, ऐ)
viii. ओदौतो: कण्ठोष्ठम्। (ओ, औ)
ix. वकारस्य दन्तोष्ठम्। (व)
x. नासिकाऽनुस्वारस्य। (अनुस्वार)